# shiva stotra by Swami Vivekananda

# શ્રીશિવસ્તોત્રમ્ - સ્વામી વિવેકાનન્દવિરચિતમ્

## Document Information

Text title : shivastotra

File name : shivastotra.itx

Category : shiva, stotra, vivekAnanda

Location : doc_shiva

Author : Swami Vivekanand

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : Ramakrishna Stotramala

Latest update : December 28,1997

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

shiva stotra by Swami Vivekananda

# શ્રીશિવસ્તોત્રમ્ - સ્વામી વિવેકાનન્દવિરચિતમ્

ૐ નમઃ શિવાય ।

નિખિલભુવનજન્મસ્થમભઙ્ગપ્રરોહાઃ
    અકલિતમહિમાનઃ કલ્પિતા યત્ર તસ્મિન્ ।
સુવિમલગગનાભે ઈશસંસ્થેઽપ્યનીશે
    મમ ભવતુ ભવેઽસ્મિન્ ભાસુરો ભાવબન્ધઃ ॥

નિહતનિખિલમોહેઽધીશતા યત્ર રૂઢા
    પ્રકટિતપરપ્રેમ્ના યો મહાદેવ સંજ્ઞઃ ।
અશિથિલપરિરમ્ભઃ પ્રેમરૂપસ્ય યસ્ય
    પ્રણયતિ હૃદિ વિશ્વં વ્યાજમાત્રં વિભુત્વમ્ ॥

વહતિ વિપુલવાતઃ પૂર્વ સંસ્કારરૂપઃ
    પ્રમથતિ બલવૃંદં ઘૂર્ણિતેવોર્મિમાલા ।
પ્રચલતિ ખલુ યુગ્મં યુષ્મદસ્મત્પ્રતીતમ્
    અતિવિકલિતરૂપં નૌમિ ચિત્તં શિવસ્થમ્ ॥

જનકજનિતભાવો વૃત્તયઃ સંસ્કૃતાશ્ચ
    અગણનબહુરૂપા યત્ર એકો યથાર્થઃ ।
શમિતવિકૃતવાતે યત્ર નાંતર્બહિશ્ચ
    તમહહ હરમીડે ચિત્તવૃત્તેર્નિરોધમ્ ॥

ગલિતતિમિરમાલઃ શુભ્રતેજઃપ્રકાશઃ
    ધવલકમલશોભઃ જ્ઞાનપુઞ્જાટ્ટહાસઃ ।
યમિજનહૃદિગમ્યઃ નિષ્કલં ધ્યાયમાનઃ
    પ્રણતમવતુ મં સઃ માનસો રાજહંસઃ ॥

દુરિતદલનદક્ષં દક્ષજાદત્તદોષમ્
    કલિતકલિકલઙ્કં કમ્રકલ્હારકાંતમ્ ।

પરહિતકરણાય પ્રાણવિચ્છેદસૂત્કમ્
    નતનયનનિયુક્તં નીલકંઠં નમામઃ ॥

– સ્વામી વિવેકાનન્દ

Encoded and proofread by Sunder Hattangadi

---

*shiva stotra by Swami Vivekananda*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*